This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥श्रीगुरुभ्योनमः॥श्रीमहात्रिपुरसुंदर्यैनमः॥
॥१॥ अथश्रीविद्योपासकानांकौलानांप्रातःकृत्यादिआह्निकंलिख्यते॥
अथश्रीमान्साधकोरजनीतूर्ययामेविबुध्यावश्यकंकृत्वाहस्तोपा
दौप्रक्षाल्यधौतेवाससीपरिधायाचम्यस्वासनेसमुपविश्यपू
जामूर्त्तौनिर्माल्यमपकृष्यप्रक्षाल्यस्वपुरतःसंस्थाप्यपूर्वदिन
पूजावशिष्टपुष्पादिनावक्ष्यमाणसमस्तप्रगटेसादिसमष्टि
विषयात्रिरभ्यर्च्यकर्पूरशकलैर्दंतधावनंकारयित्वासुगंध
जलैर्गंडूषंमुखप्रक्षालनंसूक्ष्मवस्त्रेण करास्यप्रोंछनं
चकल्पयित्वा॥ब्रह्मरंध्रस्थश्वेतसहस्रदलकमलकर्णिका ॥१॥

Acc. NO. ~~3309~~ M.1658
Title - कौलाह्निक पद्धति.
Author - ?
Date - ?
Subject - तन्त्र.
Folio - 28
Xerox - 54.

Checked 2012

KKSU LIBRARY RAMTEK 441 106 M.1658 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यांसिंहासनेसमुपविष्टंवामांगगतयादेव्यारक्तवस्त्राभरणभूषित
यावामकरे धृतलीलाकमलयादक्षभुजेनालिंगितं श्वेतवस्त्राभरणानु
लेपनंमुक्ताद्दामादिविभूषितं चंद्रार्कनिभंत्रिनेत्रंज्ञानमुद्रापुस्तकवरा
भयकरंशांतंसुप्रसन्नं शिवरूपिणंश्रीगुरुंध्यात्वा॥ तच्चरणारविंद
युगलविगलदमृतधाराभिः स्वदेहं परिप्लुतं विभाव्य संघट्टमुद्रां शि
सि विन्यस्य प्रणवत्रितारमुच्चार्य वक्ष्यमाणश्रीगुरुपादुकाविद्यांते
अमुकानंदनाथश्रीपादुकांपूजयामीतिमानसोपचारैः संपूज्य॥
यथाशक्तिंजप्त्वा॥ जपंसमर्प्यस्तुवीत॥ यथानमस्तेनाथभगवन्
शिवायगुरुरूपिणे॥ विद्यावतारसंसिध्यैस्वीकृतानेकविग्रह॥ न
वायनवरूपायपरमार्थैकस्वरूपिणे॥ सर्वाज्ञानतमोभेदभानवेचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२॥ द्धूनायते॥२॥स्वतंत्रायदयाक्लृप्तविग्रहायशिवात्मने॥परतंत्रायभक्तानां
भव्यानांभव्यरूपिणे॥विवेकीनांविवेकायविमर्शायविमर्शिनो॥प्रकाशा
नांप्रकाशायज्ञानिनांज्ञानरूपिणे॥पुरस्तात्पार्श्वयोःपृष्ठेनमस्कुर्यामुप
र्युधः॥सदामच्चिन्तरूपेणविधेहिभवदासनं॥५॥इत्येवंपंचभिःश्लोकैः
स्तुवीतयतमानसः॥प्रातःप्रबोधसमयेजपात्स्फुदिवैंभवेत्॥तत्त्रसारा सं
दहंदेवकृतकृत्योस्मिसर्वदा॥मायामृत्युमहापाशाद्विमुक्तोस्मिशिवो
स्म्यहं॥अहंदेवीनचान्योस्मिब्रह्मैवाहंनशोकभाक्॥सच्चिदानंदरूपो
हंनित्यमुक्तस्वभावयुक्॥प्रातरारभ्यसायांतंसायादिप्रातरंततः॥यत्करो
मिजगन्नाथतदस्तुतवपूजनं॥इतिप्राणायामं विधाय॥स्वमूलाधारेचतुरस्त्रवे प्र
ष्टितंवादिसांतवर्णचतुष्टययुक्तंचतुर्दलपंकजंपीतवर्णंध्यात्वातत्कर्णिका ॥२॥
यांसोमसूर्याग्निमयमकथादित्रिरेखं॥स्वाभिमुखंकुलश्रृंगाटंत्रिकोणंवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाव्य तन्मध्ये कोटिसूर्यप्रतीकाशं चंद्रकोटिसुशीतलं जपाकुसुमसमप्रभं सत्वरज
स्तमोगुणाक्रांतं कामाख्यं बिंदुं विभाव्य तदूर्ध्वे कुंडलिनीशक्तिं चिद्रूपामष्टत्रिं
शत्कलायुक्तं पंचाशद्वर्णविग्रहां श्रीविद्यारूपिणीं तडित्कोटिप्रभां दीसं बिस
तंतुतनीयसीं प्रसुप्तभुजगीमिव सार्धत्रिवलयेन स्थितां स्वेच्छादंडाहतां कृत्वो
त्थाप्य गुरूपदिष्टविधिना सुषुम्णामार्गेण मूलाधारस्वाधिष्ठानमणिपूरकाना
हतविशुध्याज्ञाचक्राख्यषट्चक्रभेदक्रमेण ब्रह्मरंध्रस्थित सहस्रदलकमलं
प्रापय ततः स्रवदमृतधारया रक्तवर्णया वर्णमया कुंडलिनीं तां संतर्प्य पुनः
सुधास्रोतःस्वरूपिणीमकुलामृतप्लुवेन सुषुम्णांतर्गततत्तदाधारतत्तद्धा
तुतत्तद्वर्णतत्तदधिदेवताः प्लावयंती माज्ञाविशुद्ध्यादिक्रमेण मूलाधारं
नीत्वा तथैव स्थापयेदित्यारोहावरोहक्रमेण परां शक्तिं कुंडलिनीं ध्यात्वा
विद्याकूटत्रयं ध्यायेत् ॥ तत्र मूलाधारे वह्निमंडलं दशकलात्मकं विभा
व्य तत्र मूलविद्यायाः प्रथमकूटं वाग्भवाख्यं स्फुरत्तडिल्लताभासुरमनाहृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२॥ नपर्यंतंप्राप्तनादशिखंविभाव्यानाहतेसूर्यमंडलंद्वादशकलात्मकंध्यात्वा
तन्मध्येमूलविद्यायाः कामराजाख्यंद्वितीयकूटमुद्यदादित्यसंकाशंआज्ञा
पर्यंतंप्राप्तनादशिखमधऊर्ध्वप्रसृतरश्मिकंध्यात्वा॥पुनराज्ञायांसोम
मंडलंषोडशकलात्मकंविभाव्यतन्मध्येमूलविद्यायाः शक्तिकूटाख्यंतृ
तीयखंडंशशिप्रभंब्रह्मरंध्रांतर्गतचिच्चंद्रमंडलपर्यंतंप्राप्तनादशिखं
अधऊर्ध्वप्रसृतरश्मिकंध्यात्वा॥ततोमूलादिब्रह्मरंध्रांतंमूलविद्या
मुद्यद्दिनकरसहस्रभासुरांतेजोदंडमयीमखंडांध्यात्वातत्तेजसाव्या
प्तंस्वदेहंपरिचिंत्यतत्तेजसापरिणतांश्रीपरदेवतांहृदयकमलेध्यात्वा
मानसैरुपचारैः संपूज्यमूलविद्ययाप्राणायामत्रयंमूलविद्यायाःव
क्ष्यमाणऋष्यादिकरषडंगन्यासांश्चकृत्वामूलविद्यांयथाशक्तिजप्त्वा ॥३॥
जपंसमर्प्य॥प्रातर्नमामिजगतांजनन्याश्चरणांबुजं॥श्रीमहात्रिपुर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुंदर्या नमितायाहरादिभिः ॥१॥ प्रातस्त्रिपुरसुंदर्या नमामि चरणांबुजं
हरिर्हरो विरिंचिश्च सृष्ट्यादीन्कुरुते यया ॥२॥ प्रातस्त्रिपुरसुंदर्या नमा
मि पदपंकजं ॥ यस्याद्यमंबुश्चिरसि भाति गंगा महेशितुः ॥३॥ प्रातः पा
शांकुशशरचापहस्तां नमाम्यहं ॥ उद्यदादित्यसंकाशां श्रीमत्त्रिपुरसुं
दरीं ॥४॥ प्रातर्नमामि पादाब्जं यया येदं भासते जगत् ॥ तस्यास्त्रि
पुरसुंदर्या यत्प्रसादान्निवर्त्तते ॥५॥ यः श्लोकपंचकमिदं प्रातः प्रा
तः पठेन्नरः ॥ तस्मै दयादात्मपदं श्रीमत्त्रिपुरसुंदरी ॥६॥ इति स्तु
त्वा प्रणम्य तस्यै निजकृत्यं समर्पयेत् ॥ तद्यथा प्रातः प्रभृति सायां
तं सायादिप्रातरंततः ॥ यत्करोमि जगद्योने तदस्तु तव पूजनं ॥ इति
समर्प्य स्वकर्मानुष्ठानाय देव्याज्ञां प्रार्थयेत् ॥ तद्यथा ॥ त्रैलोक्यचे
तन्यमयी श्वरेशि श्रीसुंदरी त्वच्चरणाज्ञयैव ॥ प्रातः समुत्थाय तव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४॥ प्रियार्थं संसारयात्रामनुवर्त्तयिष्ये॥ संसारयात्रामनुवर्त्तमानं त्वदाज्ञया॥
श्रीत्रिपुरे परेशि॥ स्पर्द्धातिस्कारकलिप्रमादभयाँ मामाभिभवंतु मातः॥२॥ नि
जानामि धर्मं न च मे प्रवृत्तिर्जानामि धर्मं न च मे निवृत्तिः॥ त्वया हृषीके
शेन हृदिस्थया हं यथा नियुक्तोस्मि तथा करोमि॥ इति देव्याज्ञां प्रार्थ्य गुरूप
देशेनेज्ञातं सहजसिद्धमजपाजपं तत्तद्देवताभ्यः समर्पयेत्॥ तद्यथा॥ अ
द्यपूर्वेद्युरहोरात्राचरितमुच्छ्वासनिश्वासात्मकं षट्शताधिकमेकविं
शतिसहस्रसंख्याकमजपाजपं मूलाधारस्वाधिष्ठानमणिपूरकाना
हतविशुद्ध्याज्ञाब्रह्मरंध्रेषु चतुर्दलषड्दलदशदलद्वादशदलषो
डशदलद्विदलसहस्रदलेषु स्वर्णविद्रुमनीलपिंगलधूम्रविद्युत्कर्पू
रवर्णेषु स्थितेभ्यो गणपतिब्रह्मविष्णुरुद्रजीवात्मापरमात्मभ्यो य ॥६॥
थाभागशः समर्पयिष्यामि॥ इति कृतांजलिः संकल्प्य समर्पयेत् तद्यथा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐऐंह्रींश्रींमूलाधारचक्रस्थायगणपतयेअजपाजपानांषट्शतानिसमर्पयामि
नमः॥१॥स्वाधिष्ठानचक्रायब्रह्मणेअजपाजपानांषट्सहस्राणिसम०२मणि
पूरचक्रस्थायविष्णवेअजपाजपानांषट्सहस्राणिस०३अनाहतचक्रस्थाय
रुद्रायअजपाजपानांषट्सहस्राणिस०४विशुद्धचक्रस्थायजीवात्मनेअज
पाजपानांसहस्रंस०५आज्ञाचक्रस्थायपरमात्मनेअजपाजपानांसहस्रंस०६
सहस्रदलकमलकर्णिकामध्यस्थितायेश्रीगुरुपादुकायेअजपाजपानांस
हस्रंस०७इतिसमर्पयेत्॥एतावत्कर्तुमशक्तश्चेत्॥मयापूर्वेद्युरहोरात्रा
चरितमुच्छ्वासनिश्वासात्मकंषट्शताधिकमेकविंशतिसहस्रसंख्याकम
जपाजपंब्रह्मरंध्रस्थसहस्रदलकमलकर्णिकामध्यवर्तिन्येश्रीगुरुपादुका
येसमर्पयामिनइतिगुरवेएनंसमर्पयेत्॥इत्यजपाजपंसमर्प्यपुनरपिअहो
रात्रमजपाजपंसंकल्पंकुर्यात्॥तद्यथा॥ॐअद्यसूर्योदयारभ्याहोरात्रेणो
च्छ्वासनिश्वासात्मकषट्शताधिकमेकविंशतिसहस्रसंख्याकमजपाजपम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५॥ हंकरिष्ये॥ इति कृतांजलिपुटः संकल्पाजपमंत्रेण प्राणायामत्रं कृत्वा त्रिरसि॥
हंसायऋषयेनमः मुखे ॐ अव्यक्तगायत्रीछंदसेनमः हृदये ॐ परमहंसायदेव
ताय॰ मूलाधारे ॐ हंबीजाय॰ पादयोः ॐ सः शक्तये॰ नाभौ ॐ सोहं कीलकाय॰
हृदये ॐ ॐकारतत्त्वाय॰ मूर्ध्नि ॐ नभसेस्थानाय॰ सर्वांगे ॐ हैमायवर्णाय॰
कंठे ॐ उदात्तायस्वराय॰ इति विन्यस्य मम मोक्षार्थे विनियोगः॥ इति कृ
तांजलिर्वदेत्॥ ततः अंगुष्ठयोः ॐ हंसां सूर्यात्मनेस्वाहा तर्जन्योः ॐ हंसीं
सोमात्मनेस्वाहा॰ मध्यमयोः ॐ हंसूं निरंजनात्मनेस्वाहा॥ अनामिकयोः ॐ हं
सैं निराभासात्मनेस्वाहा॥ कनिष्ठयोः ॐ हंसौं अनंततनुः सूक्ष्मादेवीप्रचो
दयात्॥ स्वाहा करतलपृष्ठयोः ॐ हंसः अव्यक्तप्रबोधात्मनेस्वाहा अस्त्रा
यफट्॥ इति करयोर्विन्यस्य हृदयादिषडंगे ष्वप्येतानेव मंत्रान्विन्यस्य ध्या
नं कुर्यात्॥ यथा द्यौर्मूर्धानं यस्य विप्रा वदंति खं वै नाभिं चंद्रसूर्यौ च नेत्रे॥ ॥५॥
दिशः श्रोत्रे यस्य पादौ क्षितिश्च ध्यातव्यो सौ सर्वभूतांतरात्मा इति विरोस्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपमात्मानं ध्यात्वा तदनुसंधाय प्राणवायोर्निर्गमप्रवेशात्मकं अजपामं
त्रं हंसः पदं पंचविंशतिवारं २५ जपित्वा समर्प्य ॥ गुरूपदिष्टमार्गेण नादानुसं रू
धानपूर्वकं निरस्तसमस्तोपाधिः केनापि चिद्विलासेन प्रवर्त्तमानोऽस्मी
ति विभावयेत् ॥ इत्यजपाविधिः ॥ स्वकार्यानुष्ठानार्थं ॥ ॐ समुद्रमेखले दे
वी पर्वतस्तनमंडले ॥ विष्णुपत्नी नमस्तुभ्यं पादस्पर्शं क्षमस्व मे इति भूमिं
प्रार्थ्य श्वासानुसारेण तस्यां पादं निधायोत्थाय पदे पदे स्त्रमुच्चरन् गृहाद्ब
हिर्निर्गत्य ग्रामाद्बहिर्नैर्ऋत्यां याम्यां वा दिशि शरविक्षेपमात्रां भुवमतीस
घो दूरे गत्वा मूत्रपुरीषोत्सर्गं शौचाचमनादिकं यथाविधि विधायानिषिद्ध
दिनेषु विहितदंतकाष्ठेन क्लीं कामदेवाय सर्वजनप्रियाय नम इति मंत्रेण दंता
न्विशोध्य ह्रीमिति जिह्वामुल्लिख्य दंतकाष्ठं प्रक्षाल्य पुरतः शुद्धदेशे परित्य
ज्य चतुर्लक्ष्मीमंत्रैर्वक्त्रं क्षालयेत् सिद्धिहेतवे ॥१॥ श्रीं [illegible] श्रीं ह्रीं श्रीं कम
ले कमलालये प्रसीद २ श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः ॥२॥ श्रीं ह्रीं क्लीं ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह
॥६॥ श्रीसकलरुं॥ ॥ इतिचतुर्विद्याभिमुखं प्रक्षाल्याचम्य तिलकुशकुसुमगंधा
क्षतानस्त्राभिमंत्रितत्रां कुनाशुचिस्थानादुद्धृत मृद्गोमयधौतवस्त्राण्याद
यनघादौगत्वास्त्राभिमंत्रितवारिणातीरं प्रक्षाल्यतत्रास्त्राभिमंत्रितं कुशा
सनादिकं निधायोधृतजलेनतीर्थाद्बहिः कटिशौचं सुगंधामलकाद्युद्वर्तनं
मलापकर्षणस्नानंततोमृद्गोमयादिभिः स्वगृह्योक्तविधिनावैदिकस्नानंच
विधायनाभिमात्रेजलेस्थित्वा अद्येत्यादिसंकल्पांतेदेवीमानेमुकयुगेमुक
परिवृत्तावमुकवर्षेमुकमासेमुकपक्षेअमुकनित्यायाममुकतत्त्वेश्वरानंद
नाथदिनेमुकानंदनाथवासरेमुकउदयाक्षरेमुकनाम्यांकालचक्रांत
र्गतश्रीचक्रपरबैंदवनिवासिनीश्रीपरदेवताप्रीत्यर्थंतांत्रीकविधिनास्ना
नमहंकरिष्ये॥ इतिसंकल्प्य॥ मूलविद्ययाप्राणायामत्रयंकृत्वामूलविद्या
याऋष्यादिकरषडंगन्यासांश्चविधायस्वपुरतोजलेहस्तमात्रंचतुरस्त्रंनी ॥६॥
र्थंपरिकल्प्यतत्रब्रह्मांडोदरतीर्थानिकरैस्पृष्टानितेरवे॥ तेनसत्येनमेदेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीर्थदेहि दिवाकर॥ इति सूर्यमंडलात्तीर्थं प्रार्थ्य कोमित्यंकुशमुद्रया सूर्यमंड
लं भित्त्वा गंगे च यमुने चैव गोदावरी सरस्वती॥ नर्मदा सिंधु कावेरि जलेऽस्मि
न्संनिधिं कुरु॥ इति सूर्यमंडलात्तीर्थमाकृष्य जले पुरतः कल्पिततीर्थ
मंडले मूलेन संयोज्य पुनः सूर्यमंडलादेव ६ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सर्वानंद
मयी तीर्थशक्ते एह्येहि स्वाहा इति तीर्थशक्तिमावाह्य तस्मिन् तीर्थमंड
म लेतां ध्यायेत्॥ यथा॥ सर्वानंदमयीं त्वशेषदुरितध्वंसां मृगांकप्रभां त्र्य
क्षां चोर्ध्वकरद्वयेन दधतीं पाशांसृणिं चक्रमातुः॥ दोर्भ्यां चामृतपूर्णहे
मकलशं मुक्ताक्षमालां वरां गंगां सिंधु सरिद्विराजसहितां श्री तीर्थश
क्तिं भजे॥ इति ध्यात्वा तत्र घ्रियागंधादिपंचोपचारैर्जलमयीस्तां सं
पूज्य॥ ॐ नमो भगवति अंबे अंबालिके अंबिके महामालिन्ये एह्येहि
भगवंति अशेषतीर्थालवाले न्हीं श्री शिवजटाजूटाधिरूढे गंगे गंगा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।बिके स्वाहेतिगंगामंत्रेणसप्तधामभिमंत्र्यह्रींकारेणालोड्यवमितिधेनुमुद्र
यामृतीकृत्यमूलंप्रथमकूटंमुच्चार्यआत्मतत्वात्मनेनमः॥मू०द्वि०विद्यातत्वा
त्मने॥मू०तृ०कू०शिवतत्वा०इतितत्वत्रयंजलेविन्यस्यतत्रश्रीचक्रंविभाव्य
हृदयकमलाद्देवीमावाह्यषडंगेनसंकलीकृत्यतांतावत्स्वांकिकामेश्वरसहि
तांस्नापयित्वामू०योनिमुद्रयातज्जलमष्टधाम[illegible]मंत्र्यतस्मिन्जलेमू
लेनदेवतामंत्रस्मरणपूर्वकंत्रिर्निमज्ज्योन्मज्ज्यकुंभमुद्रयामू०स्वशिरसि
त्रिरभिषिच्याचम्यमूलविद्ययादेवींत्रिःसंतर्प्यसंहारमुद्रयास्वहृदितांविसृ
ज्यतत्वैराचम्यसूर्यमंडलेतीर्थानिविसृज्य [illegible] भोतेवासिसमीपस्थि
थोयाचम्यगुरुस्तोत्रंपठेत्॥ [illegible] मूलानिल [illegible] कमलीकृताः
एवंकुलागमेतांश्चपादुकायांप्रतिष्ठितं॥ [illegible] कोटिकोटिमहादानात्को
टिकोटि [illegible] कोटिकोटिमहायज्ञात्पराश्रीपादुकास्मृतिः॥२॥को ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टिमंत्रजपात्कोटिपुण्यतीर्थावगाहनात्॥ कोटिदेवार्चनादेवि परा श्रीपादु
कास्मृतिः॥३॥ महारोगे महोत्साते महादुःखे महाभये॥ महापदि महापापे
स्मृता रक्षति पादुका॥४॥ तेनाधीतं श्रुतं ज्ञातमिष्टं दत्तं च पूजितं॥ जिह्वाग्रे
वर्त्तते यस्य सदा श्रीपादुका प्रिये॥५॥ सकृच्छ्रीपादुकां देवी यो वा जपति भक्ति
तः॥ स सर्वपापरहितः प्राप्नोति परमां गतिं॥६॥ शुचिर्वाप्यशुचिर्वा यो भ
क्त्या स्मरति पादुकां॥ अनायासेन धर्मार्थकाममोक्षाल्लभते जसः॥७॥
श्रीनाथचरणांभोजं यस्यां दिशि विराजिते॥ तस्यै दिशि नमस्कुर्याद्भक्त्या
प्रतिदिनं प्रिये॥८॥ न पादुकासरो मंत्रो न देवः श्रीगुरोः परः॥ न हि श्री
कासरो मार्गो न पुण्यं कुलपूजनात्॥९॥ ध्यानमूलं गुरोर्मूर्त्तिः पूजामूलं
गुरोः पदं॥ ज्ञानस्य मूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा॥१०॥ गुरुमूलाः
क्रियाः सर्वा लोकेस्मिन्कुलनायिके॥ तस्मात्सेव्यो गुरुर्नित्यं सिध्यर्थं भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८॥ क्तिसंयुतैः॥११॥तावदार्त्तिर्भयंदुःखंमोहश्शोकभ्रमादयः॥यावन्नायातिशरार
णंश्रीगुरुंभक्तवत्सलं॥१२॥तावद्भ्रमतिसंसारेसर्वदुःखमलीमसः॥यावन्न
भजतेभक्त्याश्रीगुरुंशिवरूपिणं॥१३॥सर्वसिद्धिफलोपेतोमंत्रस्कंधेतिशो
भनः॥गुरुप्रसादमूलोयंपरतत्त्वमहाद्रुमः॥१४॥यथाददातिसंतुष्टःप्रसन्नो
वरदोमनुं॥तथाभक्त्याधनैःप्राणैर्गुरुंयत्नेनतोषयेत्॥१५॥ब्रह्मविष्णु
महेशानदेवताकुलयोगिनः॥कुर्वंत्यनुग्रहंतुष्टागुरौतुष्टेनसंशयः॥१६॥
भक्त्यासंतुष्टेन गुरुणायोपदिष्टःकृपालुना॥कर्ममुक्तोभवेच्छिष्योभु
क्तिमुक्त्योःसभाजनं॥१७॥गुरुभक्तिविहीनस्यतपोविद्याव्रतंकुलं॥नि
ष्फलंहिकुलेशानिकेवलंलोकरंजनं॥१८॥धर्मार्थकामैःकिंतस्यमोक्षः
स्तस्यकरेस्थितः॥सर्वार्थाश्रीगुरोर्द्देवीयस्यभक्तिस्थिरासदा॥१९॥स ॥८॥
शिवोगुरुरूपेणभुक्तिमुक्तिप्रदोमम॥इतिभक्त्यास्मरेद्यस्तुतस्यसिद्धि

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रह्वरतः॥२०॥यस्यदेवेपराभक्तियथादेवेतथागुरौ॥तस्यैतेकथिताह्यर्थाःप्र
काशंतेकुलेश्वरी॥२१॥इतिगुरुस्तोत्रंसंपूर्णं॥अथविभूतिधारणे॥तीर्थमृ
त्तिकादिनोर्ध्वपुंड्रंविधायसकुंकुमेनचंदनेनत्रिपुंड्रंविधायवैदिकसंध्यांन्निर्व
र्त्यतांत्रिकसंध्यांकुर्यात्॥साचतुर्विधा॥प्रातर्मध्यान्हसायान्हमध्यरात्रिभे
दात्॥तत्रप्रातःसंध्यायथा॥श्रीगुरुगणपतिइष्टदेवताःप्रणम्यविधिवदा
चामेत्॥यथाऐंक०आत्मतत्वंशोधयामिस्वाहा॥क्लींह५वियातत्वं०सोःस३
शिवतत्वं०॥सोःसकलह्रींशिव०क्लींह५विद्या०॥ऐंक४आत्मतत्वं॥समस्त
विघाया।सर्वतत्वंशोधयामिस्वाहेतित्रिः॥एवंनवधाजलप्राशनेनत्रिराच
म्य॥मूलेनशिखांबध्वाप्राणायामत्रयंकुर्यात्॥ॐअस्यामहात्रिपुरसुंदरी
मंत्रस्य॥दक्षिणामूर्त्तिऋषिः॥पंक्तिछंदः॥श्रीमहात्रिपुरसुंदरीदेवता॥ऐं
क४बीजं॥सोःसकलह्रींशक्तिः॥क्लींह५कीलकं॥महात्रिपुरसुंदरीप्री
त्यर्थेजपेविनियोगः॥ऐंक०अंगु०क्लींह५तर्ज०॥सोःस३मध्य०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥९॥ ४ ऐं कं ४ अना० ॥ ४ क्लींह ५ कनि० ॥ ४ सौः स ३ करतल० ॥ एवं हृदयादिन्यासः ॥ अथ ध्या
नं ॥ सकुंकुमेतिध्यात्वा ॥ लमितिपंचोपचारैः संपूज्य ॥ स्वपुरतो जले बिंदुत्रिकोण
वृत्तचतुरस्रमंडलं कृत्वा क्रोमिस्यंकुशमुद्रया सवितृमंडलात्तीर्थमावाह्य वमिति
धेनुमुद्रयामृतीकृत्य क्षिप ॐ स्वाहेति गरुडया निर्विषीकृत्य मूलेनाष्टवार
मभिमंत्र्य तेन जलेन दक्षांगुष्ठानामिकाभ्यां धृतकुशैः अकारादिक्षकारांतैः
सबिंदुभिर्मातृकाक्षरैः प्रत्यक्षरं स्वशिरसि प्रोक्ष्य मूलेन त्रिः प्रोक्ष्य ॥ सूर्यमं
डले देवीं ध्यायेत् ॥ यथा भास्वद्रत्नौघमुकुटस्फुरच्चंद्रकलाधरां ॥ सद्यः सं
तप्तहेमाभां सूर्यमंडलरूपिणीं ॥ पाशांकुशाभयवरां ध्यायेद्देवीं जपेत्ततः ॥
गायत्रीं सुभगां मंत्री त्रिधा बीजस्वरूपिणीं ॥ इति ध्यात्वा ॥ दक्षहस्तेन ज
लमादाय वामहस्तेन संपुटीकृत्य लं वं रं यं हं इति पांचभौतिकमंत्रैः सप्तवा
रमभिमंत्र्य ३ मूलेन त्रिवारमभिमंत्र्य अंगुल्यंतरगलिततज्जलबिंदुभि
र्वामांगुष्ठानामिकाभ्यां मूलेन स्वशिरः स्त्रिः प्रोक्ष्य ॥ अवसिष्टजलं वाम ॥९॥
हस्ते गृहीत्वा तेजोरूपं तज्जलं वामनासाग्रमुपनीय इडयाकृष्य स्वदहां

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्थसकलकलुषंप्रक्षाल्यतज्जलंकृष्णवर्णंपिंगलयाबहिर्निर्गतंमत्वातज्ज
लंपुनर्दक्षहस्तेगृहीत्वास्ववामभागेज्वलद्वज्रशिलांध्यात्वाॐश्लींपशुहुं
फट्इतिपाशुपदास्त्रमंत्रेणतस्यांशिलायांआस्फाल्यहस्तौप्रक्षाल्यमू
लेनजलमादायप्रवहन्नाड्यासहस्रदलगगनपरमामृतेनैकीभूतंविभा
व्य॥राजदंतविवरांतर्मार्गेणनिर्गमय्य॥तज्जलंवामकरेनिधाय॥तेन
जलेनॐह्रींअमृतमालिनीस्वाहेतिमंत्रेणकुशैस्वशिरसि त्रिःप्रोक्ष्य
पूर्ववदाचम्योत्थाय॥प्रथमकूटंवागीश्वरीविद्महेद्वितीयकूटंकामेश्व
रीधीमहितृतीयकूटंतन्नःशक्तिःप्रचोदयात्॥श्रीमहात्रिपुरसुंदरीपा
दुकायैएषोर्घ्यःस्वाहेतित्रिरर्घ्यंदत्वा॥ह्रांह्रींहंसः॥श्रीसूर्यएषतेर्घ्यः
स्वाहेतिसूर्याभिमुखमर्घ्यांजलित्रयंदत्वा॥मू॰देवींत्रिःसंतर्प्य॥ह्रांह्रीं
हंसःश्रीसूर्यंतर्पयामिनमइतित्रिःसंतर्प्यमूलाधारेप्रथमकूटंतडित्को
टिसमप्रभं॥मूलादिब्रह्मरंध्रांतंसंचिंतयन्तत्तेजःसुषुम्णावर्त्मनाब्रह्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०॥ सो

रंध्रं नीत्वा ब्रह्मनासाध्वना आका[illegible]शस्थवह्निमंडले समावास्॥ ततो जैं द्रुतां वागी
श्वरीं ध्यायेत्॥ यथा॥ पीनां पीतां बरां पीतस्रग्वि भूषानुलेपनां॥ तडित्कोटिसमा
भासां बालामक्षस्रगुज्वलां॥ पुस्तकाव्यकरांभोजां वह्निपीठे निषेदुषीं॥ वा
ग्भवीं वाग्भवोपेतां त्रीक्षणां सस्मितां स्मरेत्॥ इत्याकाशे वह्निमंडले ध्यात्वा॥ स्व
धप्रथमकूटं त्रिपुरावागेश्वरीपादुकां पूजयामी॥ तिगंधपुष्पाक्षतैः स्त्रिः सं
पूज्य पुनर्वक्ष्यमाणवाग्भवगायत्रीमुच्चार्य॥ त्रिपुरावागीश्वरीश्रीपादुकायै
अर्घ्यं कल्पयामि स्वाहेति त्रिरर्घ्यांजलिमुत्क्षिप्य पुनः॥ ऐं क॥ त्रिपुरादेवी
विद्महे वागीश्वरी धीमहि॥ तन्नो मुक्तिः प्रचोदयात्॥ त्रिपुरावागीश्वरी
पादुकां तर्पयामि नमः इति त्रिः संतर्प्य॥ श्रीगुरुं प्रणम्य पूर्ववत्प्राणायाम
ऋष्यादिकरषडंगं न्यासान्विधाय तां त्रिकीं मातृकां न्यासस्थानेषु प्रण संकल्प्य
वत्रितारमूलविद्यादिन निसाविद्याहंसः॥४ मू.१८।२ आ अं नमः त्रि ॥१०॥
रसि मुखवृत्तेसादिमातृकां न्यस्य पूर्वोक्तां तुरियगायत्रीं यथाशक्तिं ज

वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पित्वावाग्भवकूटगायत्रीं जपेत्॥ सा यथा॥ ऐं क ४ त्रिपुरादेवी विद्महे वागीश्वरी धी
महि॥ तन्नो मुक्तिः प्रचोदयात्॥ इति वाग्भवगायत्रीं यथाशक्ति जपेत्॥ वाग्भव
गायत्रीजपानंतरं॥ ततो नाथपारायणस्यावश्यकत्वादादौ चतुरंगपारायणं कु
र्यात्॥ सर्वपारायणानामंगत्वात्॥ यथा एकवर्ण द्विवर्ण त्रिवर्ण वर्गभेदात्॥
अथांगपारायणं॥ प्रातराधारमध्यस्थां नवनाथात्मिकां परां॥ कालनित्या
क्षरोपेतां स्मरे त्रिपुरभैरवीं॥ इति ध्यात्वा प्रातः संध्यांगत्वेन नवनाथांस्स कं
मूलं जपेत्॥ वाराश्च घटिकाश्चैव दिनानि स्यात्तथैव च॥ वर्षमासयुगाश्चैव प
रिवृत्तिरिति क्रमात्॥ ४ मू० ८।२ आ अं ई सौः हंसः॥ ४ मू० ८।२ आ आं ई सौः
हंसः॥ ४ मू० ८।२ आ ई ई सौः हंसः॥ ४ मू० ८।२ आ ई ई सौः हंसः॥ इत्यादि क्षांतं
जप्त्वा दीपिनी पादुकाभ्यां समापयेदिति प्रथमः॥ अथ द्विवर्णक्रमः॥ ४ मू० ८।२
आ अं आ ई सौः हंसः॥ ४ मू० ८।२ आ ई ई ई सौः हंसः॥ इत्यादि क्षांतं जपित्वा
दीपिनी पादुकाभ्यां समापयेदिति द्वितीयः॥ अथ त्रिवर्णक्रमः॥ ४ मू० ८।२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥११॥

आ अं आं इं ईं सौः हंसः ॥ ७ मू० ८।२ आ ई उं ऊं सौः हंसः ॥ इत्यादि क्षांतं जपित्वा ॥ दी
पिनी पादुकाभ्यां समापयेदिति तृतीयः ॥ ३ ॥ अथाष्टवर्गक्रमः ॥ ७ मू० ८।२ आ अं
आं १६ ईं सौः हंसः ॥ ७ मू० ८।२ आ कं ५ ईं सौः हंसः ॥ ७ मू० ८।२ आ चं ५ ईं सौः हं
सः ॥ ७ मू० ८।२ आ तं ५ ईं सौः हंसः ॥ ७ मू० ८।२ आ पं ५ ईं सौः हंसः ॥ ७ मू० ८।२
आ यं ४ ईं सौः हंसः ॥ ७ मू० ८।२ आ शं ५ ईं सौः हंसः ॥ दीपिनीपादुकाभ्यां स
मापयेत् संगपारायणं ॥ प्रातर्मूलाधारगते कमले वह्निमंडले ॥ वाग्बीज
रूपां निसांतां विद्युत्पटलभासुरां ॥ पुष्पबाणेक्षुकोदंडपाशांकुशलसत्क
रां ॥ स्वेछागृहीतवपुषयुगनिसाक्षरात्मिकां ॥ घटिकावरणोपेतां परि
तः प्रांजलीनथा ॥ ज्ञानमुद्रावरकरान्वाग्भवोपासितसरान् ॥ नवना
थान्स्मरेन्मूलपंकजे योनिमंडले ॥ इत्थं प्रातः ॥ संध्याचतुष्टयेपि ध्यात्वा ॥
७ मू० ८।२ आ अं ७ क १७ श्रीसर्वानंदमयश्रीप्रकाशात्मकश्रीपरापरह ॥११॥
स्य योगिन्यानंदनाथश्रीपराशक्तिश्रीत्रिपुरभैरवीविद्याकलादेवी ईं सौः

21

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हंसः॥४मूलं०८१२आलं४ह्सैं ह्स्क्लीं ह्स्रौः श्रीसर्वसिद्धिप्रदविमर्शात्मकश्रीअतिर
हस्ययोगिन्यानंदनाथश्रीपराशक्तिश्रीत्रिपुरांबाविद्याकलादेवीईसौः हंसः॥
४मू०८१२आंकं४ह्रींश्रींसौः श्रीसर्वरोगहरआनंदात्मकश्रीरहस्ययोगिन्यानंद
नाथश्रीपराशक्तिश्रीत्रिपुरासिद्धाविद्याकलादेवीईसौः हंसः॥४मू०८१२आ
चं४ह्रीं क्लीं ब्लूं श्रीसर्वरक्षाकरज्ञानात्मकश्रीनिगर्भयोगिन्यानंदनाथश्रीप
राशक्तिश्रीत्रिपुरमालिनीविद्याकलादे०॥४मू०८१२आटं४ह्सैं ह्स्क्लीं ह्सौः
श्रीसर्वार्थसाधकसत्यात्मकश्रीकुलकौलयोगिन्यानंदनाथश्रीपराशक्तिश्री
त्रिपुरालक्ष्मीविद्याकलादे०॥४मू०८१२आतं४ह्रैं ह्स्क्लीं ह्सौः श्रीसर्वसौभाग्य
दायकपूर्णात्मकश्रीसंप्रदाययोगिन्यानंदनाथश्रीपराशक्तिश्रीत्रिपुरवासि
नीविद्या०॥४मू०८१२आयं४ह्रीं क्लीं सौः श्रीसर्वसंक्षोभणस्वभावात्मकश्रीगु
प्ततरयोगिन्यानंदनाथश्रीपराशक्तिश्रीत्रिपुरसुंदरीविद्या०॥४मू०८१२
आयं४ऐं क्लीं सौः श्रीसर्वाशापरिपूरकप्रतिभात्मकश्रीगुप्तयोगिन्यानंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६२॥

नाथश्री पराशक्ति श्री त्रिपुरेश्वरी विद्या ॥ ७ मू० ८१२ आपं ४ अं आं सोः श्री त्रैलो

क्यमोहनसुभगात्मक श्री प्रकटयोगिन्यानंदनाथश्री पराशक्ति श्री त्रिपु

राविद्या कलादेवी ई सोः हंसः ॥ ७ मू० ८१२ अ ऐं वद २ वाग्वादिनि ऐं क्लीं क्लि

2 न्ने क्लेदिनि क्लेदय महाक्षोभं कुरु २ क्लीं सोः मोक्षं कुरु २ सोः ह्सौः सर्वोद्दी

ना पनंदनाथश्री वाकुशक्ति श्री दीपिनी विद्या ॥ ७ मू० ८१२ आवक्ष्यमाणगु

रुपादुका विद्यां मूर्ध्नि संघट्ट मुद्रया सकृज्जपेत् ॥ इति नाथपारायणं ॥

रक्ताकारक्तांबरारक्तस्रग्विभूषानुलेपनाः ॥ पाशांकुशेक्षुकोदंडप्रसूनवि

शिखाः स्मरेत् ॥ इति ध्यात्वा ॥ ततः कालनिस्यांतद्दिनैर्घां जपेत् ॥ इति कोल

निस्याजपः ॥ ततो मूलादिब्रह्मरंध्रांतं मूलविद्यां मुघस्सूर्यसहस्रप्रभां ऽ

ध्यायन्मूलविद्यामष्टोत्तरशतं जपित्वा ॥ बहिराकाशस्थाग्निमंडले पूर्वो

क्तरूपां वाग्भवेश्वरीं ध्यायेत् ॥ प्रातर्वाग्भवकूटमष्टोत्तरशतं जपेत् ॥ ततः ॥६२॥

प्राणायामत्रयं ऋष्यादिकरषडंगान्यास्व विधाय ध्यानांतं कृत्वा कृतं जपं दे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऐनिवेघप्रणाम्यस्तुवीतयथा॥ नाथावृतेरुणाभासे मूलानलनिवासिनि॥ कुं
लकुंडलिवाग्रूपेनमः त्रिपुरसुंदरी॥१॥ कामराजात्मिके देविहृद्यार्कनिवा
सिनि॥ नत्तत्रात्क्याहृतेरक्तेनम॰॥२॥ ब्रह्मरंध्रेंदुनिलयेशक्तिरूपेरुणप्रिये॥
निसाभिरावृतेनिसेन॰॥३॥ मूलादिब्रह्मरंध्रांतंस्फुरत्कुंडलिनीमयी॥ पद्म
रागप्रभेतुर्येनम॰॥४॥ षट्त्रिंशत्तत्ववर्णात्माकालनिसास्वरूपिणि॥ घटि
कार्णावृतेनिसेनमस्त्रि॰॥५॥ इतिस्तुत्वाप्रणम्यसूर्यमंडलाद्वह्निमंडला
च्चदेवीवाग्भवेश्वरीचस्वहृद्येमूलाधारेच विसृज्यश्रीगुरुंप्रणमेत्॥ ॥इ
ति प्रातःसंध्याविधिः॥ ॥अत्रकर्मकालेषुगुरुध्यानमुक्तंश्रीरुद्रयाम
ले॥ दीक्षाकालेयथारूपंस्वस्यानुग्रहकर्मणि॥ दृष्टंतंतेनभावेनध्यायं
नान्हीकमाचरेत्॥ इतिगुरोरितिशेषः॥ एतद्गुरुध्यानं॥ प्रातस्मरणा
तिरिक्तस्थलेषुज्ञेयं॥ प्रातःसंध्येयमीशानिसर्वकर्मसुसर्वदा॥ कर्त्तव्या
मंत्रिणानिसमादरान्मंत्रसिद्धये॥ प्रातःसंध्यांपरित्यज्यकुर्वन्कर्मक्र जैत्यथः॥
नू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१३॥

प्रातः संध्यां परित्यज्य देवपूजादिकं चरेत्॥ मोहात्कृत्वा महेशानि नरकी जायते
नरः॥ प्रातः संध्यां परित्यज्य होमं वा तर्पणं शिवे॥ कुर्वन्निष्कारणं विप्रस्तज्जन्मभा
नो भवेद्ध्रुवं॥ पितृणां चो जायते देवि अपि वेदांतपारगः॥ संध्यानामपि सर्वासां
प्रातः संध्या गरीयसी॥ तस्मात्तान्न सज्जेद्विप्रस्तज्जन्नरकमाप्नुयात्॥ ॥इति
त्रिपुरार्णववचनादियमवश्यं कर्तव्यमिति शिवशासनं॥ ॥अथ घटीपाराय
णं॥ ॥घटीपारायणत्वेन षष्ठिजपं कुर्यात्॥ सच पंचभिर्दिवसैर्मातृकायाः
षडावृत्तिरूपः॥ तथा च तंत्रराजे॥ आरभ्य भानोरुदयमेकशो घटिकाक्रमात्॥
एकैकमातृकावर्णाः पंचाशत्सरिकीर्तिताः॥ दिवसैः पंचभिस्तस्य षडावृत्ति
रुदीरितेति॥ तस्या मातृकायाः अयमर्थः॥ चतुर्युगेष्वपि तत्र प्रथमदिने सू
र्योदयकाले अकार उदेति॥ ततो द्वितीयघटिकादि पंचाशद्घटिकापर्यंतं सु घ ता
टिकासु अकारादिक्षकारांता वर्णा विसर्गस्वररहिताः स्वस्वघटिकोदयकाले स
मुद्यंति॥ तत एकपंचाशद्घटिकामारभ्य त्रिषष्टिदशघटिकासु अकारादित्वका ॥१३॥

25

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रांताद्दशवर्णास्वस्वघटिकोदयकालेसमुद्यंति॥द्वितीयदिवसेसूर्योदयकाले
एकारउदेति॥ततःस्वस्वघटिकोदयकालेऐकाराद्येकोनचत्वारिंशद्वर्णा अ
काराद्यास्त्रिंशान्निवर्णाश्चसमुद्यंति॥तृतीयदिवसेसूर्योदये चकारउदेतिततःस्व
स्वघटि[illegible]कोदयकालेछकारादिक्षकारांताअकारादिणकारांताएकोन
षष्ठिवर्णाःसमुद्यंति॥चतुर्थदिवसेसूर्योदयेनकारउदेतिततःस्वस्वघटिकोदयका
लेथकारादिक्षकारांताअकारादिमकारांताएकोनषष्ठिवर्णाःसमुद्यंति॥पंच
मदिवसेसूर्योदयकालेयकारउदेति॥ततःस्वस्वघटिकोदयकालेरकारादिक्षका
रांताअकारादिक्षकारांताश्चएकोनषष्ठिवर्णाःसमुद्यंति॥एवंपंचभिर्दिवसैः
मातृकायाःषडावृत्तयोभवंति॥एवंक्रमेणेभिर्वर्णैर्घटिकापारायणाख्यःष
ष्ठिजपःकार्यः॥तत्प्रकारःप्रदर्श्यते॥तत्रअकारादिक्षांताःपंचाशद्वर्णा विसर्ग
स्वररहिताःदशदशभूत्वा॥पंचवर्णाअएचतयनामानोभवंति॥तैःषष्ठिजपः
कार्यः॥तत्प्रकारस्तु॥मू०८२ आअंप्रथमघटिकानंदनाथरश्मिशक्ति श्रीमहा
त्रिपुरसुंदरीविद्याकलादेवीईसौःहंसः॥मू०८२ अआंद्वितीयघटिका॥मू०८२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१४॥
आइंतृतीयघटिका०॥ मू॰ ८।२ आईं ०॥ मू॰ ८।२ आउं ०॥ मू॰ ८।२ आऊं ०॥ ६॥
मू॰ ८।२ आऋं ७॥ मू॰ ८।२ आॠं ८॥ मू॰ ८।२ आऌं ९॥ मू॰ ८।२ आॡं १०॥
मू॰ ८।२ आएं ११॥ मू॰ ८।२ आऐं १२॥ मू॰ ८।२ आओं १३॥ मू॰ ८।२
आऔं १४॥ मू॰ ८।२ आअं १५॥ मू॰ ८।२ आकं १६॥ मू॰ ८।२ आखं १७॥
मू॰ ८।२ आगं १८॥ मू॰ ८।२ आघं १९॥ मू॰ ८।२ आङं २०॥ मू॰ ८।२ आ
चं २१॥ मू॰ ८।२ आछं २२॥ मू॰ ८।२ आजं २३॥ मू॰ ८।२ आझं २४॥ मू॰ ८।२
आञं २५॥ मू॰ ८।२ आटं २६॥ मू॰ ८।२ आठं २७॥ मू॰ ८।२ आडं २८॥
मू॰ ८।२ आढं २९॥ मू॰ ८।२ आणं ३०॥ मू॰ ८।२ आतं ३१॥ मू॰ ८।२ आथं ३२
मू॰ ८।२ आदं ३३॥ मू॰ ८।२ आधं ३४॥ मू॰ ८।२ आनं ३५॥ मू॰ ८।२ आ
पं ३६॥ मू॰ ८।२ आफं ३७॥ मू॰ ८।२ आबं ३८॥ मू॰ ८।२ आभं ३९॥ मू॰ ८।२
आमं ४०॥ मू॰ ८।२ आयं ४१॥ मू॰ ८।२ आरं ४२॥ मू॰ ८।२ आलं ४३
मू॰ ८।२ आवं ४४॥ मू॰ ८।२ आशं ४५॥ मू॰ ८।२ आषं ४६॥ मू॰ ८।२ ॥१४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आसं०४७॥ मू०८१२ आहं०४८॥ मू०८१२ आळं ४९॥ मू०८१२ आक्षं ५०॥ ॐ
मू०८१२ आअं ५१॥ मू०८१२ आआं ५२॥ मू०८१२ आइं ५३॥ मू०८१२ आ
ईं ५४॥ मू०८१२ आउं ५५॥ मू०८१२ आऊं ५६॥ मू०८१२ आऋं ५७॥ मू०८१२
आॠं ५८॥ मू०८१२ आऌं ५९॥ मू०८१२ आॡं ६०॥ नंदनाथशक्तिहंसः॥ रश्मि
दीपिनीपादुकाभ्यांसमापयेदितिप्रथमादिनः॥ द्वितीयदिने॥ मू०८१२ आ
एं १॥ मू०८१२ आऐं २॥ मू०८१२ आओं ३॥ मू०८१२ आऔं ४॥ एवं क्षां
तं चतुरो वर्गा नावृत्य पुनराद्य द्वितीयवर्गा वावर्त्तयेत्॥ एवं षष्टिरावृत्त
यः॥ तृतीयदिने॥ मू०८१२ आचं १॥ मू०८१२ आछं २॥ एवं क्षांतांस्त्री
न्वर्गानावृत्यपुनराद्यांस्त्रीनावर्त्तयेत्॥ एवं षष्टिरावृत्तयोभवंति॥ च
तुर्थदिने॥ मू०८१२ आतं १॥ मू०८१२ आथं २॥ मू०८१२ आदं ३॥ एवं क्षां
ते द्वौ वर्गावावृत्य पुनराद्यांश्चतुरो वर्गानावर्त्तयेत्॥ एवं षष्टिरावृत्तयः॥
पंचमदिने॥ मू०८१२ आयं १॥ मू०८१२ आरं २॥ एवं क्षांतं वर्गं जपित्वा पुन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१५॥

रकाराद्यान्पंचाशद्वर्णानावर्त्तयेत् ॥ एवं षष्ठिरावृत्तयो मूलविद्याया भवंति ॥ ततः षष्ठे षष्ठे दिने पुनरकारादित आरभ्योक्तरीत्या घटिकापारायणमनव
रतं कुर्यात् ॥ अत्राधुनावर्त्तमानसमये साधकैर्ज्योतिःशास्त्रोक्तरीत्याहर्ग
णेन कलियुगस्य गतदिनानि ज्ञात्वा स्वकर्मारंभदिनावधि गणयित्वा पंच
भिरावृत्त्योर्वरितदिने नोदयाक्षरं ज्ञात्वा यस्मिन्दिने उदयाक्षरमकारो भव
ति तस्मिन्दिने प्रातरारभ्य घटीपारायणं प्रोक्तक्रमेण कार्यमिति ॥ घटिका
पारायणाजपः ॥ प्रातरेव कार्यः ॥ अथ मध्यंदिनसंध्या ॥ अथ प्राणायामा
दि सूर्यतर्पणं प्रातःसंध्यावदेव विधाय बीजसंध्यां कुर्यात् ॥ यथा ॥ न
तत्र माध्यान्हे अनाहतचक्रे मूलविद्यायाः कामराजकूटं रक्तवर्णं ध्यायं ना
स्तत्तेजः सुषुम्नामार्गेण वहन्नासापुटाध्वनिः सायंसूर्यमंडलेसमा
वाद्यत उद्भूतां कामेश्वरीं ध्यायेत् ॥ यथा रक्तांसुरक्तांबरभूषणाढ्यां पा ॥१५॥
शांकुशाभीतिवरं दधानां ॥ शुचिस्मितामुद्भटयौवनांगीं कामेश्वरीं सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मरत्त्रिनेत्रां॥ ॐ क्लीं ह ५ श्रीमहात्रिपुराकामेश्वरीपादुकां०॥ त्रिः संपूज्य॥ काम राजगायत्रीमुच्चार्य॥ ॐ क्लीं ह ५ त्रिपुरादेवी विद्महे कामेश्वरी धीमहि॥ तन्नः क्लिन्ना प्रचोदयात्॥ श्रीमहात्रिपुराकामेश्वरीपादुकायै अर्घ्यं कल्पयामि स्वाहेति त्रिरर्घ्यांजलिमुत्क्षिप्य पुनः कामराजगायत्रीमुच्चार्य श्रीमहात्रि पुराकामेश्वरीपादुकां तर्पयामि नमः इति त्रिः संतर्प्य॥ श्रीगुरुं प्रणम्य॥ प्रा णायामादिपुरःसरं पूर्ववन्मातृकां विन्यस्य पूर्ववत्तुरियविद्यागायत्रीं जपित्वा कामकूटगायत्रीं जपेत्॥ यथा॥ ॐ क्लीं त्रिपुरादेवी विद्महे कामेश्व धीमहि॥ तन्नः क्लिन्ना प्रचोदयात्॥ इति कामकूटगायत्री॥ यथाशक्ति जपित्वा॥ षट्त्रिंशत्तत्त्वात्मकत्वेन मूलविद्यां जपेत्॥ यथा॥ तत्र मध्यां न्हे हृदयांभोजकर्णिके सूर्यमंडले॥ कामराजात्मिकां देवीमलक्तकस मारुणां॥ प्रसूनबाणपुंड्रेक्षुचापपाशांकुशान्वितां॥ पार्श्वतश्चात्मतु ल्याभिः षट्त्रिंशत्तत्त्वशक्तिभिः॥ रक्तमाल्यांबरालेपभूषाभिः परिवारितां॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६॥ युगनित्याक्षरमयींघटिकावरणांस्मरेत्॥पुष्पबाणेक्षुकोदंडधराःशोणवपु
धराः॥हसंकजेचताःकामराजोपास्तिपरायणाः॥इतिध्यात्वा॥तत्वपारा
यणंकुर्यात्॥४मू०८१२आअंक९८ऐंह्रींश्रींऐंक्लींसौःअंआंसौःशिवतत्वे
श्री श्वरानंदनाथब्रह्मात्मशक्तिश्रीकामेश्वरीविद्याकलादेवीईसौःहंसः॥४मू०८१२
आकंऐंह्रींश्रींऐंक्लींसौःअंआंसौःशक्तितत्वेश्वरानंदनाथश्रीविष्ण्वात्मश
क्तिश्रीवज्रेश्वरीविद्याक०॥४मू०८१२आखंऐंह्रींश्रींऐंक्लींसौःअंआंसौः
सदाशिवतत्वेश्वरानंदनाथश्रीरुद्रात्मशक्तिश्रीभगमालिनीविद्याक०॥
४मू०८१२आगंऐंईंऔःईश्वरतत्वेश्वरानंदनाथश्रीतुरीयाशक्तिश्रीशुद्धवि
द्या०॥४मू०८१२आघंऐंक्लींसौःसौःक्लींऐंशुद्धविद्यातत्वेश्वरानंदनाथश्री
परब्रह्मात्मशक्तिश्रीबालात्रिपुरसुंदरीविद्याक०॥४मू०८१२आङं॰हस
कलरडैंहसकलरडींहसकलरडौःहसकलरडौःहसकलरडौःहसकलरडैं ॥१६॥
[illegible] मायातत्वेश्वरानंदनाथश्रीत्रिपुरभैरवीशक्तिश्रीद्वादशार्द्धवि०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥मू० ८१२आत्वं ऐं ह्रीं श्रीं ऐं क्लीं सौः ॐ नमो भगवति श्रीराजमातंगेश्वरी सर्वज
न मनोहारि सर्वमुखरंजनि क्लीं ह्रीं श्रीं सर्वराजवशंकरि सर्वस्त्रीपुरुषवशं
करि सर्वदुष्टमृगवशंकरि सर्वसत्ववशंकरि सर्वलोकवशंकरि सर्वजनं मे व
शमानय स्वाहा सौः क्लीं ऐं श्रीं ह्रीं ऐं श्री कलानतेश्वरानंदनाथ श्रीमहात्रिपु
रभैरवी शक्ति श्रीराज श्यामला विद्या कलादेवी ॥ ॥मू० ८१२आघं ॐ नमो
भगवते महाशुकाय त्रैलोक्य मोहनाय त्रिभुवनालंकाराय राजमदमर्द्दना
य श्रीराजानं मे वशमानय स्वाहा श्री विद्यानतेश्वरानंदनाथ श्रीबालाशक्ति
घ्रं न श्रीशुकश्यामलाविद्या ॥ ॥मू० ८१२आजं ॐ नमो भगवति शारिके सकलक
लाकोविदे विबोधय २ स्वाहा रागतेश्वरानंदनाथ श्रीशारदाशक्ति श्रीशारि
काश्यामलाविद्या ॥ ॥मू० ८१२आसं ॐ नमो भगवति वीं वीणायै मम संगीतवि
द्यां प्रयच्छ स्वाहा कालनतेश्वरानंदनाथ श्रीसिद्धशक्ति श्रीसंगीतश्यामला
विद्या ॥ ॥मू० ८१२आभं ॐ नमो भगवते वें वेणवे मम साहित्यविद्यां प्रयच्छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वाहा नियतितत्वेश्वरानंदनाथश्री त्रिपुरसिद्धशक्तिश्री साहित्य
श्यामलाविं०॥४मू०८।२ आ ठं ॐ ह्रीं हसं ति हसि ता खा पेमातं
गि परिचारिके भयविघ्नापदा नाशं कुरु २ ठठ स्वाहा पुरुषतत्वे
श्वरानंदनाथश्री परमेश्वरी शक्तिश्री हसंती विद्याकलादे०॥
४मू०८।२ आ ठं ऐं नमः उच्छिष्टचांडालि मातंगि सर्वजनवशं
करि स्वाहा प्रकृतितत्वेश्वरानंदनाथश्री ललिता शक्तिश्री लघु
श्यामलाविद्या०॥४मू० ८।२ आ उं क १४ अहंकारतत्वेश्व
रानंदनाथश्री मातंगिनी शक्तिश्री सौभाग्यविद्या०॥४मू०
८।२ आ ठं ॐ ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं प
दं स्तंभय जिव्हां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा
बुद्धितत्वेश्वरानंदनाथश्री सुंदरी शक्तिश्री ब्रह्मास्त्रवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थाकलादेवी०॥ ४मू०८।२आणऐं ग्लौं नमो भगवतिवा
र्त्तालि २ वाराहि २ वाराहमुखि २ अं धे अं धिनि नमः
रुं धे रुं धिनि नमः स्तं भे स्तं भिनि नम नः मोहे मोहिनि नमः
सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववाक्चित्तचक्षुर्मुखगतिम
तिजिह्वास्तंभनं कुरु २ शीघ्रं वश्यं कुरु २ ऐं ग्लौं ठठठ हुं फ
ट् स्वाहा ॥ मनस्तत्वेश्वरानंदनाथश्री सुखदाशक्ति
श्री वाराहिविद्या०॥ ४मू०८।२आतं ॐ ह्रीं बटुकाय
आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं स्वाहा ॥ श्रो त्रतत्वे
श्वरानंदनाथश्री भुवनेश्वरीशक्तिं महाबटुकभैरवी
विद्या०॥ ४मू०८।२आथऐं ह्रीं श्रीं ऐं क्लीं सौः ऐं ग्लौं नमो भ
गवति महामायेत्रिरस्करिणि सकलजनमोहिनि पशुजनम

श्री
ॐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८ नमश्चक्षुस्तिरस्करणं कुरु कुरु स्वाहा सोः क्लीं ऐं श्रीं ह्रीं ऐं ल क्ले
श्वरानंदनाथश्री निर्वाणशक्तिश्री तिरस्करिणीविद्या०॥श्रीपू०
न।२ आद्यं हसकल ह्रीं हसकहल ह्रीं सकल ह्रीं चक्षुस्तलेश्वरा
नंदनाथश्रीहरिप्रियाशक्तिश्रीलोपामुद्राविद्या०॥श्रीपू० न।२ श्री
धं ॐ ह्रीं ॐ जिह्वातलेश्वरानंदनाथश्री नक्षत्रवल्लभाशक्ति
श्रीभुवनेश्वरीविद्या०॥श्रीपू० न।२ आनं ह्रीं श्रीं क्लीं ॐ नमो भग
वत्यन्नपूर्णेश्वरि ममाभिलषितमन्नं देहि देहि स्वाहा घ्राणत
लेश्वरानंदनाथश्रीरतिशक्तिश्रीअन्नपूर्णेश्वरीविद्या०॥श्रीपू०
न।२ आपं श्रं आं० क्षं ईं वाक्तलेश्वरानंदनाथश्रीमहाशक्तिश्री
कामकलाविद्या०॥श्रीपू० न।२ आफं हसकल हसकहल सकल ह्रीं पाणि
तलेश्वरानंदनाथश्री शांभवीशक्तिश्री तुरीयाविद्या०॥श्रीपू० न।२ १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आं ऐं पें क्लीं सौः क ४ ह ५ स ३ सं स्रष्टिनिसे स्वाहा हं स्थितिपूर्णे
नमः ईं महासंहारिणि कृं क्रों चंडकालि फट् रं ह्स्रें स्कं महानंदे अनं
त भास्करे महाचंडकालि फट् ईं महासंहारिणि कृं क्रों चंडकालि फ
ट् हं स्थितिपूर्णे नमः सं स्रष्टिनिसे स्वाहा सकह्रीं पादतले श्वरा
नंद नाथ श्री प्राणशक्ति श्री महाशा विद्या ०॥ ७मू० ८।२ आं नें आं
ह्रीं क्रौं पद्ये हि परमेश्वरी स्वाहा पायुतले श्वरानंद नाथ श्री जी
वशक्ति श्री अश्वारूढा विद्या ०॥ ७मू० ८।२ आं में पें श्रीं उपस्थतले
श्वरानंद नाथ श्री मही शक्ति श्री मिश्रा विद्या ०॥ ४मू० ८।२ आं यं पें क्लीं
सौः व द स र वाग्वादिनी स्वाहा शब्दतले श्वरानंद नाथ श्री परमास
शक्ति श्री वाग्वादिनी विद्या ०॥ ७मू० ८।२ आं रं ह्सौः स्पर्शतले श्व
रानंद नाथ श्री पृथिवी शक्ति श्री प्रासादपरा विद्या ०॥ ४मू० ८।२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्स्लेंरवाशक्तिश्रीपराप्रासादविद्या०॥
१९ आ लं स्हौं: रूपतत्वेश्वरानंदनाथश्री भार्गवशक्तिश्रीपराविद्या०॥
श्मू० ८।२ आ वृं सो: रसतत्वेश्वरानंदनाथश्री क्रोधिनी
श्मू० ८।२ आ ह्रां ऐं ह्रीं श्रीं ह्स्रैं ह्स्क्ल्रीं श्रीं ह्रीं ऐं गंधतत्वेश्वरानंदनाथश्री अंमधुवरऐंम
शक्तिश्रीपराशांभवीविद्या०॥ श्मू० ८।२ आ वं ह्रीं श्रीं
हार्णस्छे ॐ रवंभेवन्नांकुरु कुरु स्वाहा आकाशतत्वेश्वरानंदनाथश्री पूत
नाशक्तिश्री ऊर्ध्वाम्नायसमयविद्या०॥ श्मू० ८।२ आ सं ह्सौं ऐं फ्रें म हा
चंडयोगीश्वरि ऐं वायुतत्वेश्वरानंदनाथश्री भुवनेश्वरीशक्तिश्री
उत्तराम्नायसमयविद्या०॥ श्मू० ८।२ आ हं ऐं ह्रीं श्रीं ऐं क्लिन्ने क्लीं मद
द्रवे कुले ह्सौ: स्वाहा वन्हितत्वेश्वरानंदनाथश्री वाग्भवीशक्तिश्री द
क्षिणाम्नायविद्या०॥ श्मू० ८।२ आ लं ह्स्रैं ह्स्रैं ह्स्रीं ह्स्रौ: ह्स्क्ल्रीं ह्स्रैं
भगवसंबेहसक्षमलवरय ह्स्क्ल्रीं अघोरे अघोरमुखि स्रां स्रीं
किणि किणि विच्चे निष्कलसमये परां बे स्हौं ह्स्क्ल्रीं श्रीं ह्स्रैं ह्स्रीं
१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्स्रौं सलिलतत्त्वेश्वरानंदनाथश्री कामराजशक्ति श्रीपश्चि
मोम्नायविद्या०॥ ॐमू० ८।२ आं ह्स्रैं ह्रीं श्रीं ह्स्रैं भूमितत्त्वेश्वरा
नंदनाथश्रीपराशक्ति श्रीपूर्वाम्नायसमयविद्याकलादेवी ह्सौः
हंसः॥ ॐमू० ८।२ आं ऐं वद वद वाग्वादिनि इति दीपिनीविद्या०॥
ॐमू० ८।२ आं महापादुकामु चार्य अमुकानंदनाथामुकशक्त्य
बागुरुपादुकाविद्या०॥ इति तत्त्वपारायणं॥ इति षट्त्रिंशत्तत्त्व
योगेन मूलविद्यां जपित्वा॥ ततः कालनिसादिननिसा मूलवि
द्यामष्टोत्तरशतं जपित्वा॥ हृदयकमले कोमराजकूटं बालार्क
कोटिप्रभं हृदादिब्रह्मरंध्रपर्यंतं हृदादिमूलाधारांतं च व्याप्त
रश्मिकदंबकं ध्याय कामराजकूटमष्टोत्तरशतं जपित्वा॥ प्रा
णायामादिपूर्वकं जपं समर्प्य स्तुत्वा प्रणम्य मूलदेवीं कामेश्वरीं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२० चप्राग्वद्धृदयेविसर्जेत्॥ इतिमध्याह्नसंध्याविधिः॥ ॥ ॥
अथसायंसंध्या॥ ॥ तत्रप्राणायामादिसूर्यतर्पणांतंप्राग्वद्विधाय॥
बीजसंध्यांकुर्यात्॥ यथा॥ सायमाज्ञाचक्रेहृक्षाब्जेचंद्रमंडलेमूल
तृतीयकूटंशुद्धस्फटिकसंकाशंब्रह्मरंध्रस्थपूर्णेंदुमंडलपर्यंतंध्या
त्वावहन्नासापुटेनाकाशस्थसोममंडलेसमावाह्यतदुद्भूतांदेवीं
वृद्धांध्यायेत्॥ यथा॥ शुक्लांशुक्लांबराढ्येपस्रग्विभूषाविभूषितां॥
जटाजूटधरांनेत्रत्रयोद्भासिमुखांबुजां॥ ईषत्स्फुटितदंष्ट्राच
भैरवीरूपमास्थितां॥ जरापलितसंकीर्णांलंबमानपयोधरां॥ पा
शांकुशौपुस्तकंचस्फटिकाक्षस्रजंकरैः॥ दधानांशक्तिबीजोत्थां
पूर्णेंदोर्मंडलेस्थितां॥ ध्यायेदाद्यांपरांशक्तिंशक्तिमद्भिर्निषेवि
तां॥ भोगमोक्षप्रदांशांतामम्रतामम्रतेश्वरीं॥ इतिध्यात्वा॥ २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूल तृतीयकूटमुच्चार्य ॥ त्रिपुरामृतेश्वरी श्रीपादुकां पूजयामीति
त्रिः संपूज्य ॥ वक्ष्यमाण तार्त्तीयकूटगायत्रीमुच्चार्य त्रिपुरामृतेश्व
री श्रीपादुकायै अर्घ्यं कल्पयामि स्वाहेति त्रिरर्घ्यं दत्वा ॥ पुनः सौः
स ३ श्री त्रिपुरामृतेश्वरी श्रीपादुकां तर्पयामि नम इति त्रिः संत
र्प्य ॥ श्रीगुरुं प्रणम्य ॥ प्राणायामपूर्वकं मातृकां विन्यस्य तुरीयगा
यत्रीं प्राग्वज्जपित्वा ॥ शक्तिकूटगायत्रीं जपेत् ॥ यथा ॥ सौः
सकल ह्रीं त्रिपुरे देवि विद्महे शक्तीश्वरी धीमहि तन्नोमृते
प्रचोदयात् ॥ इति शक्तिकूटगायत्रीं यथाशक्ति जपित्वा ॥
सायाह्ने षोडशनित्यासकलेन मूलविद्यां जपेत् ॥ यथा ॥
सायमाशासरोजस्थां वेदेन्दुसमद्युतिं ॥ शक्तिबीजात्मि
कां चापबाणपाशांकुशान्वितां ॥ षुगनित्याक्षरां देवीं घटिका

वरणांपरां॥ चिंतइत्वा भगवतीं नित्याभिः परिवारितां॥ पुस्तकं चाक्ष
२१ सूत्रं च दधा नास्मेरवक्त्रका॥ नित्याः षोडशाचाद्यायांसा यंकालेतु संस्म
रेत्॥ इति ध्यात्वा॥ पारायणमारभेत्॥ मू० ८।२ आं अं ऐं सकलह्रीं
सकलह्रीं नित्यक्लिन्ने मदद्रवे सौः अं कामेश्वरानंदनाथ रत्निमशो
क्ति श्रीकामेश्वरी नित्या वि द्याकलादेवी ईसौः अंसः॥ ११॥ मू० ८
२ आं आं ऐं भग भुगे भगिनि भगोदरि भगमाले भगावहे भगगु
ह्ये भगयोनि भगनिपातिनि सर्वभगवशंकरि भगरूपे नित्यक्लि
न्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते सुरेते भगक्लि
न्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभ क्षोभय सर्वसत्वा
न्भगेश्वरि ऐं ब्लूं जं ब्लूं भें ब्लूं मों ब्लूं हें ब्लूं हें क्लिन्ने सर्वाणि भगानि
मे वशमानय स्त्रीं हब्लें ह्रीं आं भगमालानंदनाथ ईसौः हंसः
२१

41

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१३५॥ म्मू॰ ८१२ आइं ह्रीं निसक्लि नेमदद्रवे स्वाहा इं निसक्लि
आनंदनाथ॰ ईसौः हंसः॥ ११॥ म्मू॰ ८१२ आई ॐ क्रों भ्रौं क्रों
स्त्रौं छ्रौं ज्रौं स्वाहा ईं भेरुं डानंदनाथ॰ ईसौः हंसः॥ १०॥ म्मू॰ ८१
२ आ ॱ ह्रीं वन्हिवासिन्येनमः॥ वन्हिवासानंद॰ ईसौः हंसः॥ १५
म्मू॰ ८१२ आ लुं ह्रीं क्लि न्ने यं क्रों निसमदद्रवे ह्रीं लुं महाव ज्रेश्वरा
नंदनाथश्री॰ हंसः॥ १२॥ म्मू॰ ८१२ आ कं ह्रीं शिवादूत्यैन
मः कं शिवदूतानंदनाथ॰॥ हंसः॥ ७॥ म्मू॰ ८१२ आ क्रें ॐ
ह्रीं हुं खेच छेक्षः स्त्री हूं स्रे ह्रीं फट् कं त्वरितानंदनाथ॰ हंसः
१२॥ म्मू॰ ८१२ आ ब्लूं ऐं क्लीं सौः लं ऊं सुंदरानंदनाथ॰ हंसः॥ ३॥
म्मू॰ ८१२ आ ल्हूं हसकलरडैं हसकलरडीं हसकलरडौः हूं नित्यानं
दनाथ॰ हंसः॥ ३॥ म्मू॰ ८१२ आ यं ह्रीं फ्रें स्त्रूं क्रों आं क्लीं ऐं ब्लूं निसम
दद्रवे हुं फ्रें ह्रीं यं नीलपताकानंदनाथ॰ हंसः॥ १७॥ म्मू॰ ८१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२२ भासें भमरयछुं औं यें विजयानंदनाथ॰ हंसः॥१॥४मू॰८१२ आ
ॐ स्वौं ॐ सर्वमंगलानंदनाथ॰ हंसः॥२॥मू॰८१२ आ औं ॐ
नमो भगवति ज्वालामालिनि देवदेवि सर्वभूतसंहारकारिके जा
तवेदसि ज्वलंति ज्वल २ प्रज्वल २ ह्रां ह्रीं ह्रूं र र र र र र र र ज्वाला
औं मालिनि हुं फट् स्वाहा औं ज्वालामालानंदनाथरश्मिशक्ति॰ हं
सः॥१३॥मू॰८१२ आ अं क्लीं अं चित्रानंदनाथ॰ हंसः॥२॥४
मू॰८१२ आ अः क १ ... अः महानिसानंदनाथ॰ हंसः॥१५॥ ह्रीं
॥ इति निसापारायणं॥ ॥ततः पूर्वं
पिनीपादुकाभ्यां समापयेदिति निसापारायणं॥
व काल निसा दिन निसा मूलविलविद्यां च जपित्वा॥ भ्रूमध्या
दिब्रह्मरंध्रपर्यंतं तृतीयकूटं सारचंद्रकोटिप्रभं ध्यायन् ब्रा
त्रिकूटमष्टोत्तरशतं जपित्वा॥ ततः प्राणायामपूर्वकं जपं सम
र्प्य स्तुत्वा देवीं प्रणम्य सूर्यमंडलाच्चंद्रमंडलाच्च मूलदेवीं भ २२

43

मंत्रेश्वरीं च हृदि न्यस्य ध्येयं विसर्जेदिति सायंसंध्याविधिः ॥ ॥
ततोर्धरात्रे तुरीयसंध्यामुपासीत ॥ सा यथा ॥ अर्कमंडले देवी
ध्यानं विना प्राणायामाद्याचमनपर्यंतं पूर्ववत् कृत्वा सहस्रा
रकमले तुरीयकूटं विद्यात्रयोदशाक्षररूपं पंचरागसम
प्रभं ध्यात्वा वहन्नासापुटेन तारकामंडलं बहिः परमाका
शे समावाह्य तदुद्भूतां भगवतीं यथोक्तरूपां ध्यात्वा तु
रीयकूटमुच्चार्य श्रीमहात्रिपुरसुंदरीश्रीपादुकां पूजया
मीति त्रिः संपूज्य पुनः तुरीयविद्यामुच्चार्य ॥ श्रीमहात्रिपुर
सुंदरीपादुकायै अर्घ्यं कल्पयामि स्वाहेति त्रिरर्घ्यं दत्वा ॥ पु
नस्तुरीयकूटमुच्चार्य श्रीमहात्रिपुरसुंदरीश्रीपादुकां
तर्पयामीति त्रिः संतर्प्य ॥ प्राणायामादिपूर्वकं पूर्वोक्तां तुरी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२२ पगायत्रीं यथाशक्ति जपित्वा कालनित्याविद्यां मूलविद्यामष्टोत्त
रशतवारं तुरीयबीजं चाष्टोत्तरशतवारं जपित्वा प्राणायामादिपू
र्वकं जपं समर्प्य देवीं स्तुत्वा परमाकाशे सहस्रदलकमलकर्णिका
यां भगवतीं सुहास्यकामकलारूपमालानं ध्यायेत्॥ इति तुरीय
संध्याविधिः॥ ॥एतत्संध्याचतुष्टयमेतद्विद्योपासकानामा
वश्यकं॥ बाह्यशक्तौ ध्याने रूपमप्यधरात्र संध्योपासनं कार्यमि
ति॥ अरुते द्वितीयदिने प्रायश्चित्तार्थमष्टोत्तरशतं मूलवि
द्यां जपित्वा पुनः कर्म कर्तुमधिकारी भवतीति शिवशासनं॥
स्नानसंध्यार्चनालोपे जपेदष्टोत्तरं शतं॥ इति तंत्रराजव
चनात्॥ मूलविद्यामिति शेषः॥ अत्र संध्यालोपे न कर्त्तव्यः
शंभोराज्ञैवमेव हि॥ दीक्षितः संध्यया हीनो न दीक्षाफलमश्नु
त इति वचनात् संध्याचतुष्टयं साधकैरावश्यकं कर्त्तव्यमिति
२३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संक्षेपः॥ अथ यदि प्रमादात्संध्यालोपो भवति तदा तन्यसं
ध्यासमये प्रोक्तप्रायश्चित्तपूर्वकं पूर्वसंध्यां विधाय तत्कालसं
ध्यां कुर्यात्॥ तदुक्तं त्रिपुरार्णवे॥ संध्याहीनोन्यसंध्यायां पूर्वसं
ध्याक्रियामथा॥ विधायोत्तरसंध्यायाः क्रियां कुर्यात्समाहि
तः॥ इति संध्याचतुष्टयं॥ इत्थं संध्यां विधाय प्रकृते प्रातः
संध्यानंतरं पित्रादितर्पणं निर्वर्त्य तां त्रिकतर्पणं कुर्यात्॥ ॥
तत्र प्राणायामत्रयादि ऋष्यादिन्यासपूर्वकं स्वसुरतो जले
पूर्ववत्तीर्थमावाहयन्निति धेनुमुद्रयामृतीकृत्य मूलेनाष्टवारम
भिमंत्र्य॥ तत्र श्रीचक्रं विभाव्य तन्मध्ये वक्ष्यमाणप्रकारेण
पीठपूजापुरःसरं देवीमावाह्य॥ सा यथा। ॐ ऐं ह्रीं श्रीं सर्वत्र॥
ममं ममं दूकाय नमः मूलाधारे॥ रेकं कामाग्निरुद्राय नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२४ स्वाधिष्ठाने ॥ २प्रप्रकृत्यै० नाभौ ॥ आं आधारशक्त्यै० २कूंकूर्मा
य० २अं अनंताय० २वंवराहाय० २पृं पृथिव्यै० २सुं सुधासिं
धवे० २रं रत्नद्वीपाय० २कं कल्पकोद्यानाय० २चिं चिंतामणि
मंडपाय० २रें रत्नवेदिकाय० २श्वें श्वेतछत्राय० २तदथः २र
२त्नसिंहासनाय० हृदयेसर्वंकल्पयेतु ॥ २धं धर्माय० दक्षां
से ॥ २ज्ञां ज्ञानाय० वामांसे ॥ २वैं वैराग्याय० वामोरौ ॥ २ऐं
ऐश्वर्याय० दक्षोरो ॥ २अं अधर्माय० मुखे ॥ २अं अज्ञानाय०
वामपार्श्वे ॥ २वैं अवैराग्याय० नाभौ ॥ २अं अनैश्वर्याय० दक्ष
पार्श्वे ॥ २पं पद्माय० २कं कंदाय० २नालाय० २पं पत्रेभ्यो० २
कें केसरेभ्यो० २कं कर्णिकाय० २अं अर्कमंडलाय० २उं सो
ममंडलाय० २वं वह्निमंडलाय० २सं सत्वाय० २रं रजसे०
२४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ तं तमसे ०२ अं आत्मने ०२ अं अंतरात्मने ०२ पं परमात्म
ने ०२ ह्रीं ज्ञानात्मने ०२ अं आत्मतत्वाय ०२ विं विद्यातत्वाय ०२
कं कलातत्वाय ०२ मां मायातत्वाय ०२ पं परतत्वाय ०२ ब्रं ब्रह्मणे ०
२ विं विष्णवे ०२ रूं रुद्राय ०२ ईं ईश्वराय ०२ सं सदाशिवाय ० हृद
ये ॥ त्रिं त्रिपुरायै ०२ त्रिं त्रिपुरेश्वर्यै ० त्रिं त्रिपुरसुंदर्यै ० त्रिं त्रिपु
रवासिन्यै ०२ त्रिं त्रिपुराश्रीयै ०२ त्रिं त्रिपुरामालिन्यै ०२ त्रिं त्रि
पुरासिद्धायै ०२ त्रिं त्रिपुरांबायै ० हृदयाष्टदलेषु कर्णिकायां श्री
महात्रिपुरभैरव्यै नम इति पीठपूजा ॥ ततो देवीमावाह्य ४ ह्स्रैं
हस्क्लीं ह्स्रौः महापद्मवनांतस्थे कारणानंदविग्रहे ॥ सर्वभूतहि
ते मातरेह्येहि परमेश्वरि ॥ एह्येहि देवदेवेशि त्रिपुरे देवपूजिते
परामृतप्रिये शीघ्रं सान्निध्यं कुरु सिद्धये इत्यावाह्य ॥ देवेशि भक्ति

[illegible] सुलभे

48

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२५

रपीगंतः कल्पितमूर्त्तौ ते जोनिरेभ्यस्वागतंमातः कुशलं जननी स्था
सुखेनेपरिवारगणान्विते॥ यावत्वांपूजयिष्यामि तावत्वांसुस्थिरा
भवेतिप्रार्थ्य॥ आवाहनादिमुद्रांप्रदर्श्य॥ आवाहिता भव॥ सं
स्थापिता भव॥ सन्निहिता भव॥ सन्निरुद्धा भव॥ संमुखीकृता॰ भ
अवगुंठिता॰ षडंगमेत्रैस्तत्तन्मुद्रांप्रदर्श्य सकलीकृता॰ भ
मृतीकृता॰ परमीकृता॰ प्रार्थिता भव॥ इति मंत्रैस्तन्मुद्रां
प्रदर्श्य॥ संक्षोभणादि ९ आयुध ४ मुद्राः प्रदर्शयेत्॥
देवीं षोडशोपचारैः संपूज्य॥ अथ नित्यामंडलं तर्पयेत्॥
शुक्लपक्षे कामेश्वर्यादि चित्रांताः॥ कृष्णपक्षे तु चित्रादिका
मेश्वर्यंताः॥ ऐं स ४ कामेश्वरी नित्या श्रीपादुकां तर्पयामि॥
ऐं भगभुगे सादिक्रमेण तर्पयेत्॥ कृष्णपक्षे॥ ऐं चक्रों ऐं चि
त्रा नित्या श्रीपादुकां तर्पयामि॥ ऐं ॐ नमो भगवति ज्वालामा २५

49

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्लिनि० ऐं ब्लौं ई सर्वमंगला० ईं भगवत्युत्रोंईविजया० ॐ ह्रीं फ्रें०
ॐ नीलपताका० ह्लुं हसकलह्रैं० ॐ नित्या० क्रं ऐं क्लीं सो: क्रं कुल
सुंदरी० ऋं ॐ ह्रीं हुं खेचछे क्ष: ० ऋं त्वरिता० ल्रं ॐ ह्रीं शि
वा दूत्ये० ह्रं शिव दूती० ल्रं ह्रीं क्लि न्ने ऐं क्रों नित्यमदद्रवे ल्रं महावज्रे
श्वरी० वं ॐ ह्रीं वन्हिवासिन्यै नम: ऐं वन्हिवासिनी० ऐं ॐ क्रों
भ्रों क्रौं० ऐं भेरुंडा नित्या० ॐ ह्रीं नित्यक्लिन्ने० ॐ नित्यक्लिन्ना०
ओं ऐं भग भगे० ओं भगमालिनी० अं ऐं सकल ह्रीं नित्यक्लि
न्ने मदद्रवे सौ: अं कामेश्वरी० अ: का० आ: महानित्यासंपुटि
त तत्त्तिथिनित्या श्रीपा० त० तुरीयविद्यामु० तुरीयांबा श्री०
दिव्यौघाख्यपरमगुरून् तर्पयामि॥ स्वप्रकाशा० स्वपरशिवा०
स्वपराशक्त्यंबा० कौलेश्वरा० शुक्लादेव्यंबा० कुलेशानंदनाथ०
कामेश्वर्यंबा० इति दिव्यौघ:॥ सिद्धौघाख्यपरमगुरून्तर्पयामि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगानंदनाथ० क्लिन्नानंद० समया० सहजा० इतिसिद्धौघः॥मानौ
२९ घात्वयपरमेष्ठिगुरूं तर्पयामि॥ रगगना० रविभानंद० रविमग्ना० मद
ना० रभुवना० रलीलानं० रभासानं० रप्रियानंद० अथस्वगुरु
त्रयतत्तन्नामपूर्वकं तर्पयेत्॥ षडंगतर्पणानंतरं मूलविद्यां श्री
महात्रिपुरसुंदरीश्रीपादुकां तर्पयामीतियथाशक्तितत्ती
र्थजलैः परदेवतामुखकमले परमामृतवृष्ट्यासंतर्प्य सम
स्तप्रकटेसादिसमष्टिमंत्रेण त्रिः संतर्प्य॥ ॐ गच्छगच्छ परं
स्थानं स्वस्थानि परमेश्वरि॥ यत्र ब्रह्मादयो देवाः न विदुः
परमं पदं इति संहारमुद्रयानिर्माल्यपुष्पेण तत्तेजः समु
द्धृत्याघ्राय पूरकेन सहस्रदलकमलं प्रापय॥ तत्क्षणं तत्ते
जो ध्यात्वा॥ सुषुम्णावर्त्मना ॐ ऐं हृदयाय नम इति हृत २९

ममानीय तन्त्रोक्तरूपां ध्यात्वा ॥ ॐ तिष्ठ तिष्ठ परे स्थाने
स्वस्थाने परमेश्वरि ॥ यत्र ब्रह्मादयः सर्वे सुरास्तिष्ठंतु
मे हृदि ॥ इति हंस अपवक्षणं सपरिवारां श्रीचक्रगतां वि
भाव्यमानसे रभ्यर्च्य षडंगेन संकलीकृत्य दशधा जप्त्वाक्ष
णं विश्राम्य पुनस्तेजो रूपां तां कुंडलिनी रूपेण मूलाधारा
दि ब्रह्मरंध्रांतं ध्यात्वा मूलाधारे स्थापयेत् ॥ गंगापुष्क
र॰ नत्तीर्थं प्रापयेत् ॥ इति तर्पण विधिः ॥ ॥ ॥
अस्य श्रीमहापादुकामंत्रस्य हंस ऋषिः अव्यक्तगा
यत्री छंदः श्रीमहापादुका देवता हं बीजं सः शक्तिः
सोहं कीलकं पादुकासिध्यर्थे विनियोगः ॥ हस्रां मिस्रां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

52

२७ दिषट् दीर्घैः षडंगः ॥ ध्यानं ॥ सहस्रदलपंकजे० १ ॥ स्वप्रका
शगुरुमूर्त्तिरेकिकानदिमर्त्तितनुरेकिकातयोः ॥ सामरस्य
चतुरिष्यतेस दापादुकापरत्रिवासनोगुरोः ॥ २ ॥ संचिंत
यामि चरणौ कुलरंध्रपीठे शंभोरशेषजननस्थितिनाश
हेतोः ॥ षष्ठ्युत्तरशतदिव्यमरीचिकांतेशांतेपदोपरि
षडन्वयनक्रभक्तौ ॥ ३ ॥ वंदेगुरुपद० ४ ॥ वरदाभयकि
रीटमकरकुंडलमुद्रांप्रदर्श्य ॥ पंचोपचारैः पंचमुद्रांप्रद
र्श्य ॥ मनुः ॥ यथाशक्तिजपित्वा जपं गुरवे समर्प्य प्रणमेत्
४ ह्स्रौं हसक्षमलवयरां ह्सक्षमलवयरूं हसक्षमलव
यरीं ह्स्रौं हसक्षमलवयरूं श्रीपरपावकसर्वाराध्यस
र्वमूर्ध्वपुरनाथसर्वगुरुस्वपंगुरश्रीगुरुनाथरह २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ससमलवयरूं ह्स्रैं हसक्षमलवयरीं हसक्षमल
वयरूं हसक्षमलवयरां श्री रां भुयुरूं ह्स्रौं श्री अमु
कानंदनाथामुकराचर्यंबा श्री ● पूं नमइति ॥ ॥



समस्तप्रकटगु
प्तगुप्ततरसंप्रदा
यकुलकोलनिग
र्भरहस्यातिरहस्य
परापरातिरहस्य
योगिनीचक्राधिदे
वताश्रीमहात्रिपुर
सुंदरीश्रीपादुकांपू
जयामीतित्रिःसंतर्प्य॥

K K S U LIBRARY
RAMTEK
441 106
M-1658
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=01.10.20 11:30
,TRANSFERRED=2020/10/01 at 11:39:42
,PAGES=54
,TYPE=STD
,NAME=S0003799
,Book Name=M-1658-KOUKALIK PADHATI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection